CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 594

Title Sadāśiva saṃhitā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 594 Subject: Paurānic lit

Title: Sadāśiva saṁhitā

Author: Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.4" by 4.8" Extent: 29 foll. (no. 1 missing)

Language: Sanskrit Script: Devanāgarī

Remarks: Begins abruptly.

देवजनार्दन ॥१॥ सर्वेषांत्वं परंज्योतिः परमात्मा प्रकृतेः परः ॥ गुणेश्वरगुणाम
यः गुणातीत महेश्वर ॥२॥ रघुवंशयशश्चंद्रवर्द्धनो विश्वभावन ॥ सुमित्राहृद
यानंद चंद्रको विश्वपालक ॥३॥ विषयेभ्यः परं ब्रह्मत्वमात्मा सर्वदृक्प्रभुमान्
॥ दाशरथे महाराज राक्षसानां कुलांतकः ॥४॥ रामानुज महाबाहो देवदेव रमा
पते ॥ सहस्रमूर्द्धनि विश्वात्मन् कार्यकारणतत्वविन् ॥५॥ अस्माकं विषयांधा
नां स्कृतीनां त्वं तथैव तमां ॥ परमात्मनि रघुश्रेष्ठे श्रीरामे परमाद्भुत ॥६॥ त्वं त्रांति
राशीन्महादेवेत छांतिं कर्तुमर्हसि ॥ प्राकृतप्रलये प्राप्ते व्यक्ताव्यक्ते गते पुरा

७ ॥ उदरी ज्ञत्य संरोधा दूर्वानामिरिवात्म ज्ञानकी ज्वसी क्रियते सृष्टिः पाल्यते के
नवा पुनः ॥ ८ ॥ कीदृशं वा मरं स्थानं यत्र तिष्ठति राघवः प्रकृत्या वस संरोधः वो
धश्चकेन जायते ॥ ९ ॥ कुत्र क्रीडति विश्वात्मा जानकीप्रेमलंपटः ॥ श्रीरामस्य
परं धाम सीतायाः सदम नो हरं ॥ १० ॥ निर्गुणं निरहंकारं निर्विकारं निरंजनं ॥ नि
रामयं निराभासं निर्विघ्नं निर्लेपकं ॥ ११ ॥ सदसद्भ्यः परं वस्तु यतु ज्योतिरमल
त्रिवं ॥ गुह्यात् गुह्यतमं दिव्यं यत्र कुत्र विराजितं ॥ १२ ॥ निर्गुणं अमृतत्सर्वं नि २
त्य सच्चिद्गुणान्वितं नारायणादिरूपाणि ज्ञात्वा वा स्वामिरच्युतं ॥ १३ ॥ सगुणं

अमृत तत्सर्वं वक्तुं बुद्धिर्न तेः पुनः ॥ ब्रह्मेति यद्वेतेति यामिर्यद्रूपं परमाद्भुतं ॥ १
४ ॥ तद्रूपं कथयास्माकं त्वं देवः सर्वेश्वरः ॥ किं रूपं किमधिष्ठानं कितेजः
परमाद्भुतं ॥ १५ ॥ यतु सकृत्वा न निवर्त्तते संसारार्णववर्त्मनि ॥ श्रुत्वैतत्पर
मप्रीतः सुमित्रानंदवर्द्धनः ॥ १६ ॥ श्वासान्मुच्य नृपुनः प्राह स्मृतीश्वेतः पुरा
किन ॥ अस्माकं स्वामिनो भ्रातुः पादपद्मद्विदृक्षया ॥ १७ ॥ युष्माभिः दृष्टतं सर्वं
नागम्यतन्निगमात्मम ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ १८ ॥
पंचांगोपासनेनैव रामे भक्तिः प्रजायते ॥ अहो नागप महो नागपमीदृशं वो

सनोगतं ॥१९॥ अवश्यमेव वक्तव्यं युष्माकं हितमुत्तमं ॥ नमस्कृत्य जगन्नाथं दे
वदेवं वृषध्वजं ॥२०॥ विष्णुं ब्रह्माणमेकाग्रात केवलं सवषडंतं ॥ यत्नतः कृत्वा प्राणि
नः सर्वे नष्टुं नयोनिमाविशात ॥२१॥ गुह्यात्गुह्यतमं दिव्यं गुह्यानां गुह्यमुत्त
मं ॥ तत्सर्वं संप्रवक्ष्यामि श्रुत्वा मनसि संदधतु ॥२२॥ सगायपरस्त्रिष्यायदत्वा
महत्सु सवाप्नुयात ॥ इदं सत्यमिदं सत्य सत्यमेतन्न नयः संस ॥२३॥ अन्यथा
पर्नवं कृत्वा तिर्यग्योनिमवाक्नयात् ॥ महर्लोकं स्थितं तदूर्ध्वमेककोटिप्रमा
णतः ॥२४॥ कोटिद्वयेन विख्यातं जनलोकं व्यवस्थितं ॥ चतुःकोटिप्रमाणतस्तप ३

लोकं विराजितं ॥२५॥ उपरिष्टात्ततः सत्यमष्टकोटिप्रमाणतः ॥ आपसव्या
सकोमारं कोटिषोडश संभवः तदूर्ध्वे परिसंख्यातं सुमालोकं सुनिश्चितं ॥
शिवलोकं तदूर्ध्वं तु प्रकृत्याच समागतं ॥२७॥ विश्वस्य पुरतो दृष्टिशिवस्य
पुरतो बहिः ॥ तस्माद्बहिरावृत्तिसप्तावरणसंज्ञकं ॥२८॥ तदूर्ध्वे सर्वसत्वा
नां कार्यकारणसाक्षिणं ॥ निलयं परमं दिव्यं महाविष्णुवव संज्ञकं ॥२९॥
शुद्धस्फटिकसंकाशं नित्यस्वच्छं महोदयं ॥ निरामयं निराधारं निराबुद्धिस
मांकुलं ॥ नास्वमानस्वव पुष्पावयनूसा संविज्ञमितं ॥ मणिस्तंभसहस्रेस्त

निर्मलं स्तुवनोत्तमं ॥ ३० ॥ वज्रवैडूर्यमाणिक्यग्रथितं रत्नदीपकं हेमप्रासा
दमालाव्याप्ततरवः कामजातयः ॥ ३१ ॥ रत्नकुंभैरसंख्यातैः पुरुषैर्लयवासि
भिः ॥ स्त्रीरत्नैः परमाह्लादैः संगीतध्वनिमोदितैः ॥ ३२ ॥ स्फुरंतं च समवितं रम्यं पर
न्नतोरणमंडितं ॥ कामरूपस्वरूपं तु नारीरंगगायमाक्विनिःसृता ॥ ३३ ॥ अनंतयो
जनोच्छ्रायमनंतयोजनायुतं ॥ यत्र शेते महाविष्णुर्भगवान्जगदीश्वर ॥ ३४ ॥
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् । यन्निमेषाज्जगत्सर्वं लयीभूतं ५
व्यवस्थितं ॥ ३५ ॥ कोटिकोटिसहस्राणां ब्रह्मांडानां सहस्रशः । उद्भवंति विनश्यं

तिकालज्ञानविद्बुधैः ॥ ३६ ॥ यद्दर्शनेन समभूता ब्रह्मा विष्णुर्महेश्वराः ॥ कार्य
कारणसंपन्ना गुणत्रयविभावकाः ॥ ३७ ॥ यत्राश्चावर्त्तंते विश्वं यत्रैव च प्रली
यते ॥ तद्विद्धि परमं धाम मदीयं पूर्वसूचितं ॥ ३८ ॥ एतत्तुभ्यं समाख्यातं तदद्वातुर्वां
स्थितं हि नः ॥ तदूर्ध्वं तु परं दिव्यं सत्यमन्यद्व्यवस्थितं ॥ ३९ ॥ न्यासिनां योगिनां
स्थानं जगवज्ञावनात्मनां ॥ महाशंभुर्मोदते तत्र सर्वशक्तिसमन्वितः ॥ ४० ॥
तदूर्ध्वं तु परं स्थानं महावैकुंठसंज्ञकं ॥ वासुदेवादयस्तत्र व्यूहरंति स्वमाय
या ॥ ४१ ॥ तदूर्ध्वं तु स्वयंसां तं गोलोकं प्रकृतेः परं ॥ वाङ्मनोगोचरातीतं ज्योतीरू

पं सनातनं ॥४२॥ नित्यं गुणमहोत्साहं नित्योत्सव गुणान्वितं ॥ सौभाग्य निलयं
कांतमानंदकर मंदिरं ॥४३॥ नित्यानंदमयं रम्यं गुणोत्पत्तिमहोदयं ॥ सर्वर्तुगु
ससंयुक्तं भ्रमद्भ्रागणसेवितं ॥४४॥ पुण्यद्विपसमाक्रुष्टं तुष्टं च परमर्षिभिः ॥ म
रितांजलकल्लोलं विलोलनलिनीकुलं ॥४५॥ तुलसीपुष्पसौभाग्यं नित्यानंतव
नमोदितं ॥ वासंतामृतपकाशोकपारिजातमहोदितं ॥४६॥ मालतीयूथिकाम्भो
जकुंदमंदारसेवितं ॥ केतकीमल्लिकाजातीसंहतकंदवघनमंडितं ॥४७॥ दिव्य ५
रत्नसमाकीर्णंहरिवंशसुरस्लकं ॥ इदं वेदापरं रम्यं संदध्यो वांछितं हिन

ः ॥४८॥ यत्रास्ते चरत्नयंमुन्या सरयूर्विरजा वृदा ॥ सुरभिः सुरगणा यत्र वृंदादेवी
मनोहरा ॥४९॥ यत्र संतानकं नामवनं दिव्यं हरेः प्रियं ॥ तत्रैव देव्याबंदाया वनं
कामदुघैर्द्रुमैः ॥५०॥ तयोर्मध्ये पुरं दिव्यं साकेतमिति संज्ञितं ॥ योषिद्रत्नम
णिस्तंभसंसमादृगुणसेवितं ॥५१॥ दिव्यचामरसंयुक्तं मुक्तादामविलंबनं
चंद्रातपघनच्छायाहेमकुंभसुरस्कृतं ॥५२॥ पताकातोरणै रम्यं सुधासारघना
चलं ॥ विकटाद्रिविचित्रकूटगोवर्द्धनगिरित्रयं ॥५३॥ चामरग्राहिणी पुण्या प्रम
दायुतनायकं ॥ परिषा दुर्गसंकीर्णमणिवज्रकपाटकं ॥५४॥ दसकल्लास

मापन्नं प्रमिन्नकपिस्त्तकं ॥ चन्तुर्धारपरामक्कं वक्रिविकुसुरस्मिकं ॥ ५५ ॥ पूर्व
प्रवीरदक्षो तरवारिपिताः सुरनायकाः ॥ आत्मतुल्यवलोपेतास्सर्वैश्वर्यगुणान्वि
ताः ॥ ५६ ॥ महावला महात्मानो रामध्यानपरायणा रामांघ्रिभक्तिनिरतानित्र रा
ताश्चेषा द्वन्द्वयः ॥ ५७ ॥ दिव्यांवरधराः सौम्यादिव्याभरणभूषिताः ॥ दिव्यगं
धानुलिप्तांगा दिव्यमाल्यविभूषिताः ॥ ५८ ॥ पद्मसूत्रगुणोपेतालसन्मौलि
किरीटिनः ॥ सिंहासने समासीना ललनायुतसेविताः ॥ ५९ ॥ गदेषुचापमेला ६
ग्रतरुहस्ताश्च वस्थिताः ॥ सुग्रीवांगदो वीरो वविभीषणानिलात्मजो ॥ ६० ॥ प

श्चिमां पाति धर्मात्मा राज्ञा सेव्यो हरिप्रियः ॥ पूर्वमाहत्य विश्वात्मा सुग्रीवस्तेज
सात्मकः ॥ ६१ ॥ उत्तरं रक्षति वीरो वालिपुत्रो ममप्रियः ॥ दक्षिणं तु सदापा
ति हनुमान्नाम वत्सलः ॥ ६२ ॥ सर्वसत्वगुणोपेतः ॥ सर्वसत्वनिकेतनः महा
त्मानु स्वयं सोपि कपिरूपो दुरासदः ॥ ६३ ॥ सीतादत्तमहारोसो जितारूम
हान्तुजः ॥ श्रीरामपार्श्वदेर्नित्ये हरिराज्ञस्सयूथपे ॥ ६४ ॥ रक्षतं पुरतः सम्य
क् सालतालशिलायुधैः ॥ वलश्च प्रवलश्चैव नंदकश्चापिनंदकः ॥ ६५ ॥ चं
डो वीरः प्रचंडश्च नंदकश्च सुनंदकः ॥ नन्दश्चापि सुनन्दश्च द्वारोपेताः सुरेश्व

रा: ॥६६॥ चतुर्भुजाः सायुधाश्च सर्वाभरणभूषिताः एतैरपि वृतं मध्ये देवा
नां कपियूथपैः ॥६७॥ नलकुमुदनीलाद्याः स्कल्पवेषाकिसोरकाः निर्विकारा
महोदाराधीरोदात्तगुणोत्तराः ॥६८॥ गदाहस्ताकामरूपा रामावयवसत्तवाः ॥ म
हासत्वाः कल्परूपारामसत्कारहस्तकाः ॥६९॥ अंतरंगाः प्रियतमास्त्रंगावरणपाल
काः ॥ गायंति सुस्वरं प्रीत्या नृत्यंति मधुरस्वराः ॥७०॥ जयश्च विजयश्चैव वरायुधधरा
वुभौ ॥ दिवानांप्रवरौ नित्यौ सप्तमेपि समुपस्थितौ ॥७१॥ भवनस्योत्तरे वेदाद्दिग्विभागे ७
समेखिले ॥ सर्वतः कांचिनी भूमिर्दिव्योद्यानं समुद्यमे ॥७२॥ ब्रह्मालिकोकिलस्थ

नादितेसुककूजिते ॥ वृंदागुल्मघनच्छायेकुंजपुंजमधुस्रवे ॥७३॥ चिंतामणिम
हापीठे सर्वसत्वनिकेतनं ॥ तन्मध्ये परमोदारं कल्पवृक्षो वरप्रदः ॥७४॥ वक्षांग
यष्टिकः श्रीमानू करुणाकुरुमूलकः ॥ षट्प्रेमरसश्रावी वांछीत्वचिसमावृ
त ॥७५॥ दानस्वभावः सततं स्थितिर्मार्गगतिर्जयः ॥ इंद्रनीलमणिप्रख्यनित्य
श्रवत्सुपुत्रकः ॥७६॥ धर्मार्थकामपुष्पालिस्कंदशाखसमुत्थितः ॥ प्रवालसंज
रीरम्यमानंदपुष्पसंचयः ॥७७॥ चिंतामणिफलोत्पत्तिः ॥ करोतु वांछितं हि न
ः ॥ तपस्याधः परमं दिव्यं रत्नमंडपभूषितं ॥७८॥ तन्मध्ये वेदिकारम्या स्वर्णरत्न

विभूषिता ॥ तन्मध्ये च परं श्रेष्ठं रत्नसिंहासनं शुभं ७९ सहस्रारं महापद्मं
कर्णिकारसमन्वितं तन्मध्ये मुद्रिकाभिन्नमुद्राद्यापि विभिन्नकं ८० वह्निदु
मंडलेनापि वेष्टिते विंदुभूषितं ॥ चंद्रकोटिप्रतीकाशं छत्रकं वसचामरं ॥ ८१
सदामत्तघनश्यावी मुक्तादामवितानकं ॥ तन्मध्ये जानकीदेवी सर्वशक्तिसम
न्विता ८२ यत्रासिनं भगवान्रामः सर्वदेवशिरोमणि ॥ तत्रादौ चिंतयेन्नेत्रो वह्नि
रूपं सशक्तिकं ८३ तेन सामहताश्लिष्टमानंदैकाग्रमंदिरं ॥ एकाग्रमनसा प ८
श्यतन्त्रदेवं सुविग्रहं ॥ ८४ ॥ स्निग्धमिंदीवरश्यामं कोटींदुललितद्युतिं ॥ चिद्रूपप

रमोदारं वीरसंद्रं रघूद्वहं ॥ ८५ ॥ द्विभुजं मधुरं शांतं जानकीप्रेमक्लिलं ॥ दोर्दंड
चंडकोदंडशरं चंडं महाप्रभुं ॥ ८६ ॥ सीतालिंगितवामांगं कामरूपोरसोत्सुकं
॥ अरुणांकुशसंकाशं विकचांबुजपादकं ८७ पदद्वंद्वनखचंद्रश्रियतेजस
तावृतं ॥ कूर्मपृष्ठसदाभासरणं मंजीरपादकं ॥ ८८ ॥ कटिसूत्रांकितं श्रीसंय
रा३ ज्ञसूत्रैरलंकृतं ॥ रत्नकंकणकेयूरशोभिताग्रहेमहृदयं ॥ ८९ ॥ चंद्रकोटिप्रति
भासं कौस्तुभेनविराजितं ॥ दिव्यरत्नसमायुक्तं मुद्रिकाभिरलंकृतं ॥ ९० ॥
नाशांग्रो कसमायुक्तं मुक्ताफलस्फुरत्सुखं ॥ सूर्यकोटिप्रतीकाशं कुंडलाद्य

ष्कृतिहृदयं ॥९१॥ प्रस्फुरत्तारुण्यं संकाशं किरीटेन विराजितं ॥ गोविंदं गोविदां
श्रेष्ठं चिन्मयानंदविग्रहं ॥९२॥ दिव्यायुधसुसंपन्नं दिव्याभरणभूषितं ॥ श्रीव
त्सांकेवलं ब्रह्म पीतकौशेयवाससं ॥९३॥ शंखचक्रगदापद्मवर्मामिहलमूसलै
ः तद्रूपैर्विविधाकारैः सेव्यमानं परात्परं ॥९४॥ भानुकोटिप्रतीकाशं चंद्रको
टिप्रमोदकं ॥ इंद्रकोटिमहामोदं वसुकोटिवसुप्रदं ॥९५॥ विष्णुकोटिप्रतीका
शं ब्रह्मकोटिविसर्जनं ॥ रुद्रकोटिप्रमर्दनं मातृकोटिविनाशनं ॥९६॥ भैरव ९
कोटिसंहारं मृत्युकोटिविवर्तकं ॥ यमकोटिदुराधर्षं कालकोटिप्रधावकं ॥९७

गंधर्वकोटिसंगीतं गणकोटिगणेश्वरं ॥ कामकोटिकलानाथं दुर्गाकोटि
विमोहनं ॥९८॥ सर्वसौभाग्यनिलयं सर्वानंदैकदायकं ॥ कौसल्यानंदनं रा
मं केवलं नवघटनं ॥९९॥ विश्वावसुचित्रकेतुचित्रसेनाद्यकल्ककौ ॥ तुंब
रैनारदाद्यैश्च सुकपीकसुकंठकैः ॥१००॥ गीयमानं परं तत्वं श्रुतिज्ञातिवि
ग्रारहैः ॥ अनंतानंतसमुद्भूतमुनिनारदरूपिणा ॥१॥ संगीयमानं वीणायां वा
ल्मीकिना तरात्मना ॥ मत्स्यकूर्मवराहश्च नृसिंहहरिवामनैः ॥२॥ भार्गवं हलि
कं माररिबुधकल्किविमिश्रितैः ॥ उपास्यमानं देवेशं देवानां प्रवरं विभुं ॥३

तत्रवागीश्वरीदेवीमाधवीप्रियवल्लभा॥अमीताचसीताचैवअग्रस्चतिर्गुणा
संभवा॥४॥उमादेवीमहामायाश्रुतिज्ञातिविशारदा॥पद्महस्ताविसाला
क्षीकमलाहरिवल्लभा॥५॥सुरज्ञाप्रेममानित्यावृंदादेवीमनोरमा॥चिदा
त्मकंसदाज्ञासेनयनानंददायकं॥६॥सुकांतंकदयारामरामेराज्ञीवलोचनं
॥निर्विकाराप्रद्युम्नोण्पोराघवंपर्युपासते॥७॥उर्वशीमेनकारंभाराधाचं
द्रावलीतथा॥हिमाक्षेमावरारोहापद्मगंधासुलोचना॥८॥हंसिनीगालिनी
गालिनीपद्माहरिनीमृगलोचना॥कर्पूरांगीविसालाक्षीशक्तिप्रियारमोत्त १०

मा॥९॥चारुनेत्राचारुगात्रासर्वांगीचारुलोचना॥रामाग्रेपरिवृत्यंतेगीत
वादित्रमोहिता॥१०॥गोपकन्यासहस्त्रैस्तुगोपबालैश्चताद्रुमैः॥गोकुलैरावृतं
सप्पकपद्मसख्यादिभिस्तथा॥११॥अथावरणं॥अंगादिपरिसंकीर्णमात्मा
दिशक्तिरंजितं॥वेष्टितंवासुदेवाद्यैःसेवितंहनुमदादिभिः॥१२॥नयान
यकलावेशाध्वष्टादिभिः॥सुमंत्रितंवसिष्ठवामदेवादिज्ञानानंदविनोद
कं॥१३॥अंगोत्पत्तिकलावेशानीलादिवलमोदकं॥असादंसशस्त्रासुत्पत्तिध्रु
वादिपरिवेष्टितं॥१४॥इंद्रादिदशादिक्पालैर्वेष्टितंननतकंधरैः॥वज्राद्यायुधै

द्विश्चैः पूजितं करपालितैः ॥ २५ ॥ तासां मध्ये वरारोहा तप्तकांचनसन्निभा
॥ विद्युच्चैलांचलिना पिवीजयंती पतिं मुदा ॥ २६ ॥ वामांगाश्लिष्टदिव्यांगा यज्ञ
श्रयविधायिनी ॥ त्रिमानंदसुखोत्पत्तिचिद्रूपा परमाकुला ॥ २७ ॥ ज्ञप्तिमात्रा
त्मिकानंदा सर्वैश्वर्यरसोत्सवा ॥ अर्धमात्रात्मिका नित्या चोंकारस्वरसंभवा
॥ २८ ॥ सर्वसक्तिमयी रम्या शाक्तीनां शक्तिदायिनी ॥ जननी सर्वभूतानां यो
गिनामपि मोहिनी ॥ २९ ॥ स्वमयात्मविधात्रीत्वा परमानंदरूपिनी ॥ परमा ११
नंदसंदोहा ज्ञानानंदसुविग्रहा ॥ ३० ॥ सा सीता भगवती ज्ञेया राघवांशावि

भिः सतां तया देव्या परं वेदा कलि कलि प्रकथ्यते ॥ २१ ॥ ब्रह्माविष्णुश्च रुद्रश्च दे
वेंद्रो ऋषयस्तथा ॥ सर्वकाले गणा ये वराजसी शक्तिरूपिका ॥ २२ ॥ जगती पा
लने शक्तिर्लक्ष्मीरूपा सर्ववस्तुनां संहारे समनुप्राप्ते तामसी शक्तिरुत्तमा ॥ २३ ॥
विश्वगर्भा विगर्भा वै मूलप्रकृतिसंज्ञका ॥ यस्याः कटाक्षमात्रेण ब्रह्मांडानां
सहस्रशः ॥ २४ ॥ आविर्भावस्तिरोधानं किं पुनः सृष्टिरेकधा ॥ तत्पार्श्वे राघवस्या
थ परमस्य च विश्वसृक् ॥ २५ ॥ प्रतिलोम्नि च ब्रह्मांडं श्वा वर्धंति मुक्तमुक्तः ॥ सा तु दे
वी परा नित्या सोथ रामः परो हरिः ॥ २६ ॥ तयोरेकं विज्ञानीयात् न कार्यकारणका

रणात् ॥ तयोर्जीवसमापन्नात्कुमारः समपद्यत ॥ २७ ॥ शृंगाराख्यः सुकुमार
ः सर्वलोकैकमोहनः ॥ येन विश्वं सितं विश्वं येन सर्वमिदं ततं ॥ २८ ॥ येन वशी
कृतास्त्रावा यस्मिन् सर्वं प्रलीयते ॥ गोविंद इति विख्यातो रामसत्वा विश्वंसि
तः ॥ २९ ॥ सांकेतपश्चिमद्वारात् वृंदावनसमुद्गतः ॥ गोगणैरावृतः श्रीमानुद्ध
रणाद्रिफणिविनोदकृत् ॥ ३० ॥ सर्वरासरसोत्पन्नो गोपकन्यासमावृतः ॥ गोवर्द्ध
नगिरिस्तत्र यत्र देवः प्रतिष्ठितः ॥ ३१ ॥ एतद्गुह्यं परं देवा युष्माकं तदकाम्यया १२
॥ कथितं सानुपूर्वेण राघवस्य परं महत् ॥ ३२ ॥ एतत्कृत्वा परं धाम सनसारा

घवस्थितं ॥ उद्धरेत्सप्तगोत्राणां सैकोत्तरशतं कुलं ॥ ३३ ॥ यत्र कुत्र मृतो वापि
तिष्ठेत्कुत्र वसन्नपि ॥ गोलोके नियतं वासः सत्यं सत्यं वदाम्यहं ॥ ३४ ॥ दि
वैरपि दुराधर्षैः किं सुतान्यगणैरपि ॥ अश्वमेधसहस्राणि वाजपेयशतानि
च ॥ ३५ ॥ अटनं सर्वतीर्थेषु प्रदानं सर्वसंपदां ॥ एतद्ध्यानयोगस्य कलां ना
र्हति षोडशीं ॥ ३६ ॥ ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च ॥ स्वर्णस्तेय
सुरापानि गुरुतल्पायुतानि च ॥ ३७ ॥ कोटिकोटिसहस्राणि उपपापानि यान्यपि
॥ सर्वाण्यपि प्रणश्यंति रामधामसविस्तवनात् ॥ ३८ ॥ इति श्री सदा

शिवसंहितायां निरुक्तलक्ष्मणायां रामानुजवेदसंवादे गोलोकवर्ण
नाम प्रथमो॥१॥ श्रुतयऊचुः॥ श्रुतमस्माभिरीशानरहस्यं परमाद्भुतं॥ इदं विश्वं क
थं जातं सौमित्रे वद तत्वतः॥२॥ सौमित्रिरुवाच॥ शृणुध्वं हि श्रुतयः सर्वा रह
स्यं सृष्टिसंभवं यथा ह्युपरि संभूतं यस्मिन्नेव प्रलीयते॥२॥ सृष्टेरग्रे परंधाम्नि
संवादः॥ किमस्ति तु किल महाशंभुर्महाविष्णुर्महामायेरितः पुरा॥३॥ महा
शंभुर्महामाया महाविष्णुश्च सक्रियः॥ कालेतु समनुप्राप्ते राघवं परिचिंतय 13
न्॥४॥ महाविष्णुरुवाच॥ कस्माद्द्वाविरहं तात केन वाऽनिरुत्तमा॥ किं मूलं कि

मधिष्ठानं कुत एवं समागतं॥५॥ कथं मूलं विजानामि तव देव प्रसादतः॥ ए
तन्निश्रोतुमिच्छामि प्रसादं कुरु मे प्रभो॥६॥ महाशंभुरुवाच॥ अखंडब्रह्मणो नि
त्या तु राघवाश्चित्यविग्रहात्॥ चिदात्मका त्परानंदा तु साकेतनगराधिपा
त्॥७॥ मिथुनं श्रुतावज्ञातं सीतायां गविमोक्षणात्॥ एकं वस्तु यथाधारेना
नात्विनोपलक्ष्यते॥८॥ तथैकं परं ब्रह्म नित्यलीलासु विग्रहं॥ अद्वैतं सर्वतं
त्रे शुक्लीपुरुषव्यवस्थिति॥९॥ महाविष्णुरुवाच॥ कथमेतद्विजानामि मिथुनं
ब्रह्मसंभवं॥ सीता कापि परा नित्या रामको वा सदात्मकः॥१०॥ त्वं देवः परम

ज्योतिमतेयं परमां गतिः । युवाभ्यां परतो नित्यो कोतो देवो सुरेश्वरो ॥ २१ ॥ सं
शयो मे महान् जातः हृदये परिवर्त्तते । अनुग्राह्यस्त्वयाख्यातो पुत्रो हृद्यदि तस्य
व ॥ २२ ॥ महाशंभुरुवाच शृणु तात प्रवक्ष्यामि रामस्याद्भुतकर्मणः । सीतायाश्चाप
रं दिव्या लीलामात्रं खिलं जगत् ॥ २३ ॥ श्रुतिश्चैव स्मृता धात्री स्मृता वाक् च शक्ति
रूपिका । कालानिलसमा रुद्रा वर्णपंचात्मभूषिता ॥ २४ ॥ इंद्रनीलमणिस्निग्ध
रुचिराकृतिरव्ययः । द्विभुजावयवो ह्येकः शरकोदंडमंडितः ॥ २५ ॥ इति रा २४
मविग्रहवान् परं ब्रह्माभिधीयते । भुक्तिमुक्तिप्रदानार्थं साधकानां पुनः पुन

२६ ॥ आनंदवाचकः शब्दविभूतिसंप्रयोजितः । अतो विष्णुं विजानीयात्पूर्णकेते
र्वपुमागतं ॥ २७ ॥ एवं ज्ञेया परं नित्या सीता ब्रह्मस्वविग्रहा । अनुग्रहार्थमस्मा
कमेकं ब्रह्मद्विधाकृतं ॥ २८ ॥ आनंदावयवो भिन्ना नित्यलीलास्वविग्रहा । सर्वश
क्तिमयी धात्री सर्वशक्तिमयी तथा ॥ २९ ॥ प्रेमा नित्यसुखा त्वत्र नित्यरूपा चि
दात्मिका । ज्ञानमयी ज्ञानभूता ज्ञानदा ज्ञप्तिमात्रिका ॥ ३० ॥ अर्द्धमात्रात्मिकाश
श्वत् विंदुनादस्वरूपिणी । ब्रह्मोत्पत्तिरसौ विशा ब्रह्मैकपदमव्ययं ॥ ३१ ॥ निः
कला पिकलाधीशा निर्गुणापि गुणात्मिका । नित्योत्सवा परात्मिग्धारा भावयवसं

नवा ॥२२॥ लीलार्थं हि विभोर्नित्यं राघवस्य विहारिणः ॥ आविर्भावं तिरोभावं
करोति गुणसंगतः ॥२३॥ विश्वोत्पत्ति गुणोप्येषा जगदानंदकारिणी ॥ श्रीराम
संनिधिवशात् करोति विकरोति विकरोति च ॥२४॥ इंद्रकोटिसहस्राणि
ब्रह्मांडानां शतानि वै ॥ लीलामात्रं जगधात्री सीतायाश्च निबोध मे ॥२५॥ अ
हं तया महादेव्या संप्रहृतोनया सह ॥ आद्या सृष्टिस्थितिर्व्याप्तं जनको तव
सुव्रत ॥२६॥ आवाभ्यां त्वं महाबाहो सर्वदेवेश्वरेश्वर ॥ आविर्भूतो गुणो वाम
ः सर्वकारणकारणं ॥२७॥ एषा देवी महामाया सीता देहसमुद्भवा ॥ प्रकृति २५

गुणसंपन्ना योनिरूपा प्रकीर्त्तिता ॥२८॥ एषाहं परमं ज्योतिस्तल्लिंगं भगवा
न् शिवः ॥ आद्योजातो महाबाहो कालेन महमायया ॥२९॥ योनिलिंगात्मकं वि
श्वं रामवीर्ये प्रतिष्ठितं ॥ रामबीजसमुद्भूतं विद्धि सोमात्मकं जगत् ॥३०॥ यथांग
सूक्ष्मवीर्यस्य प्राकृतस्य महाद्रुमं ॥ तथैव रामवीर्यस्य जगदेतच्चराचरं ॥३१॥
योनिरूपा महामाया तल्लिंगो भगवानहं ॥ अनयोरपि तुल्यार्थे दर्शितश्च म
हानघ ॥३२॥ सीतारूपा महामाया रामरूपो ह्यहं विभो ॥ आभ्यां जातस्य देवस्य
करोमि विकरोमि च ॥३३॥ मिथुनं मत्वया दृष्टं मधिष्ठानं समूलकं ॥ एतत्सर्वं

मया ख्यातं गुह्याद्गुह्यतमं महत् ॥ महाविष्णुरुवाच ॥ धन्योऽसि कृतकृत्योऽसि
जितात्मासि महेश्वर । वाङ्मनोगोचरातीतं ॥ यत्त्वया प्रकटीकृतं ॥ ३४ ॥ इदा
नीं लब्धसंज्ञोऽस्मि भूततत्त्वविशोधनात् । ज्ञानेश्वर्यवलोत्साहैरामहेशमशाक्तो
यद्दहितं ॥ ३५ ॥ त्वयाऽऽख्यातं त्वया तातरामधामनिरूपितं । सीतायाश्च तथा दे
व्याः कीर्तयित्वा तु निश्चितं ॥ ३६ ॥ इच्छामि त्वां महादेव कथ्यतां यद्दिरोचते ॥ सं
शयो मम हा नाशाय ॥ तच्छ्रोतुं कर्तुमर्हसि ॥ ३७ ॥ कस्मिन्नु धाम्नि च विश्वात्मा स २६
तया सह राघव । दिविक्रीडापरो देवः सर्वशक्तिविनोदकृत् ॥ ३८ ॥ केदेवाग्र

नयन्त्यत्र के संति पार्श्ववर्त्तिनः । द्वारपालाश्च ये तस्य किं रूपेण व्यवस्थिताः
॥ ३९ ॥ कोऽदिव्यः परमादिव्या या यामिः मार्द्धं नृपात्मजा ॥ आत्मसातु कुरुते मे प्रा
रमयंति रघूद्वहा ॥ ४० ॥ महाशंभुरुवाच ॥ शृणु त्वं देवदेवेश नागमात्मपदमव्यय
॥ रहस्यं रामदेवस्य सीतायाश्च विशेषतः ॥ ४१ ॥ आद्यं तु वैष्णवं धाम नाका
स्पं समातनं । भक्तिमुक्तिप्रदं नाथं कथयामि खिलात्मकं ॥ ४२ ॥ यत्तु कृत्वा
नश्यंति जंतवो विषयार्णवे । अंतश्चित्त्या बहिर्युक्ता निर्वाणगुणकर्मसु
॥ ४३ ॥ श्रवणाद्यस्य विशेषः कूटस्थो रघुनंदनः ॥ निर्विकारी वनवारीमाया

शतविनोदकृत् ॥४४॥ अनिर्भिन्नगंभीरत्वान्निर्गुणोगुणसंसदि । नित्यलीला
गुणारामोविरामःपरमंपदं ॥४५॥ सर्वदृक्सर्वभोक्ताचकर्त्ताहर्त्तारिघूद्वह
ःज्ञानकौशद्यानंदमहोत्मासविनोदकः ॥४६॥ यत्रास्तिभगवान्देवोनित्यरू
पोजनार्दनः । तद्धामपरमंदिव्यमखंडमप्रकृतेःपरं ॥४७॥ जोजनानांश्रातार्द्धद्व
पेरधाम्निशिवास्पदे । महाविष्णुशिवस्थानेवैकुंठमनुवनार्द्धगो ॥४८॥ केवले
द्वैतरहितेमायातीतेगुणोज्झिते । गोलोकेहरसंचारेप्रेमोल्लासवरमोद्भवे ॥४९॥ २७
गुणोल्लासहरस्सामोदेदेवसर्वनमस्कृते । सर्वर्त्तुरामसंपन्नेसर्वभावसमन्वि

ते ॥५०॥ ऋषिसंघसुरानीकैर्नित्यरूपरिसेवितैः । स्यांनेकवलोल्लासहेर्देवतुल्यप
राक्रमैः ॥५१॥ रुद्रब्रह्मकपिश्रेष्ठदैत्यराजसमपन्नगैः ॥ पार्षदैरस्त्रसंपन्नैर्वीरधीरै
रणोत्कटैः ॥५२॥ सीतासीतस्वरूपांगैस्वरास्यैरतिविचित्रमैः । तद्गुणरूपसंपन्नैर्दि
व्यान्तरगणैःपूषितैः ॥५३॥ लललनायुतसंवादैरामांघ्रिसेवनोत्थितैः । अन्योन्यप्र
क्तिसंवादैर्नीरूपकरुणाश्रितैः ॥५४॥ अवतारैरसंख्यातैःप्रधानैर्दशाश्रि
तैस्तथा । वेदैःसांगोपनिषदैर्यज्ञैर्बहुविधैरपि ॥५५॥ सेव्यमानेपरेरम्येगु
णावासेपरंपदे । सर्वदागुणसंवादैषड्वर्गरिपुवर्जिते ॥५६॥ आनंदस्वरू

पनित्ये परे पारे गुणान्विते ॥ सरयूजलकल्लोलविमंडितमन्मथे ॥ ५७ ॥ त
स्याश्चांतःपुरे दिव्ये सांकेतकुवनोत्तमे ॥ जानकीपदसंचारे विहरति विचित्रमे
॥ ५८ ॥ तुलसीकुंदमंदारचंपकाशोकमल्लिकेवापीकूपतडागादिप्रफुल्लक
मलोत्तमे ॥ ६० ॥ अखंडब्रह्मसंदोहे स्वरूपानंदविग्रहे ॥ सीतांगपरिसंभूतानेक
शक्तिमनोहरे ॥ ६१ ॥ सीतांघ्रिकमलस्पर्शाज्जातांकुरमहस्वके ॥ सुरद्रुमलता
गुल्मछायारम्यप्रमोदके ॥ ६२ ॥ संतानकमहारण्ये प्रकारण्ये सुमंडिते ॥ स्वप्रका १८
शरसश्यामसुखव्रतमहोत्सवे ॥ ६३ ॥ कल्पवृक्षतलछाये सर्वाधारसमन्विते ॥ वि

तामणिमहापीठरत्नमंडपमध्यगे ॥ ६४ ॥ तन्मध्ये वेदिकारम्या तत्रादिव्यांत
रासनं ॥ तत्र सिंहासने दिव्ये हेमांबुजदलाष्टके ॥ ६५ ॥ तदूर्ध्वे कर्णिकामध्ये सु
खात्रयविनिम्नके तत्र देवं समासीनं सीतया सह राघवं ॥ ६६ ॥ अखंडब्रह्मानि
र्वाणक्षिसुतंखररसहदनः ॥ कोदंडखंडदोर्दंडशरश्रासविभूषितः ॥ ६७ ॥ दिव्यायु
धसुसंपन्नो दिव्याभरणभूषितं ॥ अदस्यः सर्वतत्वानां बुद्ध्यादीनां गुणाश्विनां
॥ ६८ ॥ तेजःपुंजः सदाभासं खंडितावानपालकः ॥ अनंतानां गुणागंसीरोरोदांत
गुदांगुणोत्तरा ॥ ६९ ॥ आनंदगुणविज्ञेयो निस्यानंदः स्वरूपद्रुकल्पेतन्पद्य

णो महातपसदोदक्षमनोरथी ॥७०॥ आत्मरक्षकगुणसंपन्नो बुध्या दिविर्विलक्षि
त ॥ दक्षणादक्षपगुणातीतो दक्षसद्गुणकर्मणां ॥७१॥ एवंहि भगवान्वीरः ॥ पुरु
षः ॥ सदसत्परः ॥ दिव्यशक्तिगुणाविष्टः सीतायासहराघवः ॥ परंव्योम्निसदा
नासे दिव्यतिस्मपुनःपुनः सच्चिद्लीलावपुः श्रीमान्सर्वानंदैकमंदिरः ॥७३
एकंविहरतस्तस्य श्रीरामस्यात्तरोत्तमः ॥ अहंजातो नया सार्धंसीतया विश्वका
रणात् ॥७४॥ कालेनाप्यवितर्केण असिवाकुलविक्रमः ॥ सच्चिद्रूपाखिलव्यापी १९
गुणानुकगुणाद्दकविसुः ॥७५॥ महोत्साहो महावीरो महावीर्यो महाबलः ॥

तेजस्वभावद्रुधर्षो गुणानामीश्वरः प्रभो ॥७६॥ सर्वाधारसमर्थोहं सर्वकारण
भावनः ॥ तत्वोत्पत्तिर्गुणावासो निरामोगुणकर्मसु ॥७७॥ मायाविनोदसक्तां
गो मायोदधिरनंतकः ॥ मायारंगविभिन्नात्मा मायोदधिविलंघनं ॥७८॥ नित्य
स्वस्थाप्रतीकाशाकालात्मा कालकृद्विसुः धीरः कलयता कालः कालधर्मविव
र्जितः ॥७९॥ कालैश्वर्यगुणारंभो विरामनूतरेषु वे ॥ विश्वंद्वेतोदधिष्ठंतां विश्व
नुकविश्वदृकस्तुचिः ॥८०॥ इयं शक्तिस्तथा जाता जननी तव सुव्रत विश्वयो
निरधिष्ठात्री विश्वधात्री खिलेश्वरा ॥८१॥ मोहिनी सर्वसत्वानां जननी सर्वसं

पदं ॥ विश्वोत्पत्तिलयावासं रूपत्रयविधारिणी ॥ ८२ ॥ कालरात्रिर्महारात्रि
र्महामारीस्वरूपिणी ॥ ईश्वरी सर्वभूतानां मोहनी योगिनामपि ॥ ८३ ॥ सक्तानां
हितस्वरूपांगी विरूपांगी च षडःकृतानि त्यरूपा वितर्केयं हेतुवादगुणोदिष्ट
॥ ८४ ॥ चिरकालपरान्नीष्टाध्यानायोगादिभिः परैः ॥ ध्येयांघ्रिकमलानित्या यो
गिहृद्देश्वहर्म्मिग्ना ॥ ८५ ॥ चिदात्मिका सदानंदा ब्रह्मानंदैकविग्रहा ॥ ज्ञाणम
यी कला विशाचित्शक्तिर्विश्वधारिणी ॥ ८६ ॥ मायो ब्रह्मपरानंदरसरूपा गुणात्मि २०
का ॥ ज्ञानानंदगुणाभासाचिद्रूपा वर्णरूपिका ॥ ८७ ॥ निर्विकारा निरुत्साहा

गुणतत्वविभाविनी निरालंबा निराधारा कूटस्था विश्वभाविनी ॥ ८८ ॥ ऋग्य
जुःसामवेदानामुच्चारध्वनिरूपिका ॥ वेदार्थग्रथितात्मा व्याकव्या सा हव्यरू
पिणी ॥ ८९ ॥ योगिनां मानसांभोजहृद्स्म रूपा पराजिता । योगमुद्रा महामा
या कालवेगप्रहारिणी ॥ ९० ॥ अस्यां जातोसि देवेश सत्तः परतरो महान् ॥
सर्वैश्वर्यगुणाधारा कालयानविनोदकृत् ॥ ९१ ॥ आत्मनिष्ठा परा काष्ठा नि
ष्ठशांतिप्रकाशवान् ॥ नानातत्वलसद्देहः प्रकृतिर्गुणवान्विभुः ॥ ९२ ॥
भगवान्पुरुषः साक्षी आत्मानंदैकविग्रहः ॥ निराश्रयो गुणग्रामप्रकृति

गुणाढ्यकृष्णचि ॥९३॥ आत्मस्फूर्तिः सदानंदनिरस्तप्रकृतिर्मतः ॥ नानात
त्वविहारोपिप्रकृतिनिलयो महान् ॥९४॥ सदानंदः सदात्मा सः सदानंदः
सनातनः ॥ सर्वशक्तिमनोहारि सर्वशक्तिविनोदकृत ॥९५॥ कारणार्णव
साक्षी च सर्वाधारवरासनः ॥ सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात्
॥९६॥ महाविष्णुर्महातेजाः स्वप्रकाशो गुणात्मवान् ॥ विद्यानिधिर्महाष्टंग
कृपापांगविमोक्षणः ॥९७॥ कृपामयो महाबाहो महादेवो महेश्वरः ॥ लक्ष्मी २२
वान् गुणसंपन्नः ॥ सर्वाश्चर्यैकमंदिरः ॥९८॥ सहस्रादित्यदुर्द्धर्षः ॥ सहस्र

चक्रवान् हरिः ॥ सहस्रायुधसंपन्नः शार्ङ्गधन्वा गदाधरः ॥९९॥ दुर्गमस्कदुरा
राध्यो दुर्जयो दुरतिक्रमः ॥ निर्गुणात्मा गुणातीतो गुणाधीशः ॥ स्वयंस्वराट ।
१००॥ परंज्योतिरतातीतो यो विष्णुराधनडुरातनः कृपापांगविमोक्षेण कोटि
ब्रह्मांडकारकः ॥१॥ एतत्स्तुत्वा महाविष्णुं देवाश्च महेश्वर ॥ शनैः शनै
:समुत्थाय दंडवत्पतितोस्तुवि ॥२॥ नमस्ते विश्वनाथाय नमस्तेखिलनाविने
॥ नमस्तेस्तु महाशंभो नमस्ते विश्वरूपिणे ॥३॥ ब्रह्मलिंगस्वरूपाय मायया
लिंगकुंटविने ॥ लीलामात्राखिलाधारतनवे विश्वरूपिणे ॥४॥ आनंदके

दमूलायसंसाविज्ञात्मनेनमः। व्यक्तायाव्यक्तरूपायकार्यकारणसंसदि
॥५॥ प्रसीदभगवन्देवकृपांकुरुमहेश्वर। अश्वपालनयाकरिष्यामिब्रह्मां
डानांसतानिवै॥६॥ महादेवउवाच॥ आत्मतुल्यबलैश्वर्ययुक्तश्चात्मानमात्मा
नाविनश्य ज्ञातथा पुत्रकुरुकार्यंयथोचितं॥७॥ ध्येयंमूर्त्तिंजगद्धातुरामस्या
द्भुतकर्मणः। सीतांघ्रिकमलंमूर्ध्नि ध्यानंत्वांकर्तुमर्हसि॥८॥ सौमित्रिरुवाच॥
कृत्वातद्वचनंघोरंमहाविष्णुश्चचिंतयन्॥ आत्मैश्वर्यप्रकाशेन। कालेनवि २२
कृतात्मना॥९॥ मायाबलानुरोधेनज्ञानेनसहितेजसा। अष्टजन्मसहस्रावेदावि

ष्यान्प्रकृतियान्बहून्॥१०॥ मीश्वरान्गुणसंपन्नान्। देवानीकविवर्द्धि
तान्॥ विचित्रगुणभेदेनअविशेषणरसात्मना॥११॥ चिरंवकुप्रयासेनकृटा
सक्तिरेवतनान्॥ तांस्तथासविलोक्याथहरिर्नारायणःस्वराट्॥१२॥ विष्टरु
त्रिविधंतेजोलीलयाविश्वकृद्विभुः॥ अंशांतेषुमहाविष्णुः। कृपयादत्त
वांस्तत॥१३॥ चैतन्यघनविज्ञप्तिर्विविधस्त्वर्यसंज्ञकान्॥ तेषांजातास्त्रयो
देवा ब्रह्माविष्णुमहेश्वराः॥१४॥ प्रकृतिबोधकाः सर्वेचैतन्यघनविग्रहाः
सर्वैश्वर्यगुणाधाराः। प्रभवोविश्वकर्मणि॥१५॥ रजसावर्द्धतेब्रह्मासो

मत्स्यकल्पोद्भवः॥ सत्वेनैव महाविष्णुर्वैकुंठो देवः प्रतिष्ठितः॥१६॥ तमसा च
महारुद्रः सर्वसंहारकारकः॥ एक एव त्रिधा भिन्नः सृष्टिस्थितिलयात्म
कः॥१७॥ तिष्ठ विष्णुर्महातेजाः ब्रह्मकोशो तु जंतवः प्रविष्टाः सहसा देवा उ
दतिष्ठन्नु अपलान्नतः॥१८॥ चेष्टमाना स्ततो लोका गुणकर्मविवर्द्धिताः॥ इंद्र
शा प्रथिताख्यग्रा आयांति प्रलंति व॥१९॥ अग्निमेघानि मे घाम्पा महाविष्णोर
चेतना॥ कालः कटाक्षमात्रेण खंडितास्या पितामहः॥२०॥ ऋतिरुवाच॥ २३
प्रवृत्तिश्च कृता देवलोकानां वदनात्तव॥ त्वया वसनुवर्त्तंते तेन निवर्त्ति

फलान्वितः॥२१॥ सौमित्रिरुवाच॥ दृष्टाथ विविधं वेदा ब्रह्मांड तत्व दृहितं॥ स
ह सर्वैर्महातत्वैः सलोका काम मनोरथं॥२२॥ जगाम विमलं धाम महाशांभव
मीश्वरं॥ तं दृष्ट्वा विमलं ज्ञानं सर्वदेवेश्वरेश्वरं॥२३॥ परं ज्योतिः परंस्थानं परा
कांशा परात्परं॥ पंचवक्त्रं महालिंगं मायाशक्तिमकल्मषं॥२४॥ इंदुकोटिप्र
तीकाशं सूर्यानलसमेक्षणं॥ स्वज्ञानध्वस्ततिमिरं मायागुणविडंबनं॥२५
प्रणम्य च महादेवमुवाच परमेश्वरं॥ कृतांजलिपुटो भूत्वा सानंदं गद्गदा
कुलः॥२६॥ त्वतं सर्वं महाशंभो मीश्वरं साधिदैवतं॥ अहं तत्र प्रविष्टश्च गुण

कर्मविज्ञानगवित्। २७। इमे देवा मदंशेन चैतन्यघनविग्रहः। ज्ञानतश्चेश्वरत्वा
वश्च ब्रह्मा विष्णुमहेश्वराः। ते उस्त्रयमयास्पृष्टकालकर्मविज्ञानवैः॥ निश्चु
क्तास्तेषु कुर्वन्ति ज्ञानवासनाबन्धनमो। २९। प्रवृत्तिश्चक्रतातातलोकानां नित
रामया॥ निवृत्तिकथमत्रेमि तन्मसंसारबंधनात्। ३०॥ महाशंभुरुवाच
एवमात्मप्रवक्ष्यामि लोकानां हितमुत्तमं। श्रवणात्कीर्त्तनाप्राज्ञः पदं याति
निरामयं॥ ३१। रामांघ्रिकमलध्यानात्स्वर्णानंदरमाप्लुतः॥ आत्मारामप्रिया २४
नंदो ब्रह्म प्रभुरलंपदं। ३२। इयं महेश्वरी देवी योगज्ञायोगमुद्रिका। विनारा

मत्प्रसादेन क्षणमेकं न तिष्ठति॥ ३३॥ कथयिष्यतिते सूत्रं रहस्यं भक्तिव
र्द्धनं॥ कामाहिनष्टचित्तानां जनानां पथमुत्तमं॥ ३३॥ महाविष्णुरुवाच॥
त्वं माता जगतां धात्री ज्ञानवीकरुणात्मिका॥ महाशक्तिर्महाविद्या महामेधा
सरस्वती॥ ३५॥ महामोहा च मोहा च घोररूपा विशारदा॥ चिन्मयी सात्वि
की विद्या राजसी तामसी परा॥ ३६॥ कथयस्व महामाये सीतापतिरनुत्तमं
॥ रहस्यं मूत्रं मंबंधं निबंधं विदुषामपि॥ ३७॥ केनोत्पन्नं कुतो वापि लब्धके
नप्रवर्त्तितं॥ मंत्ररूपं महाध्येयं भक्तिपदत्तरं मम मितं॥ ३८॥ निरुक्तिलक्षणं वे

दाप्रमाणं वेदसंमितं ॥ सर्ववीजमयं सूत्रं माध्वरामानिरन्तत् ॥ ३९ ॥ म
हामायेवा कदाचित्सूयते विश्वं येन वात्रायते नयात् ॥ इति सूत्रपदं प्रोक्तं
ब्रह्मलिंगनिदर्शनं ॥ ४० ॥ सूत्रमूलमिदं विश्वं सूत्रे सर्वं प्रतिष्ठितं ॥ सूत्रेण
जायते विश्वं विना सूत्रं विलीयते ॥ ४१ ॥ प्रणम्यादौ महादेवं देवदेवं रघु
द्वहं ॥ जानकीवल्लभं कांतं विष्णुं जं परवेरिणं ॥ ४२ ॥ रामाभिध्यानसौभाग्यात्
सीतापदनिषेवणात् ॥ किंचिद्गुणानामिदं वेशं सूत्रं मंत्रिप्रवर्त्तनं ॥ ४३ ॥ २५
महाविष्णुसहस्राणां महाशंभुशतस्य च ॥ सृष्टिस्थितिसल्लानां चकर्त्ता

सोरघुनंदनं ॥ ४४ ॥ सीतानिवत्यापरासूक्ष्मा सेषदाशरथिः प्रभुः ॥ रामोद्वे
कः परः सत्यो नान्यः सत्यं कदाचन ॥ ४५ ॥ ज्ञापथं करोमि तिवत्सपादयोन
स्कतप्रभो ॥ रामादन्यत्र संवेमि परिदैवं सदीश्वरं ॥ ४६ ॥ ब्रवैतेषपरं व्यो
म्निधाम निप्रभुरीश्वरः ॥ सीताबेसरमामोदविनोदरतिविभ्रमः ॥ ४७ ॥ क
पयामासषुत्रेयसदाशिवापराघवः ॥ मंत्रं षडक्षरं तारं मंत्रिणां कल्पभूरु
हं ॥ ४८ ॥ रामं च ब्रह्महा शंभुर्लब्धवान् मंत्रमुत्तमं ॥ सुप्रकाशं सदा वोधं हृद्वि
नार्णवतारकं ॥ ४९ ॥ पुरुषार्थप्रदं सम्यक् ब्रह्महत्याकोटिविनाशनं ॥ ज्ञानदीपक

लाद्धृतं सर्वविद्याफलप्रदं ॥ ५० ॥ सर्वेषां मंत्रवीर्याणां श्रेष्ठो वैष्णवउच्य
ते तेषु वैष्णवमंत्रेषु राममंत्रः फलाधिकं ॥ ५१ ॥ गणपत्यादिसौरेषु शिव
शाक्तिजपेषु च ॥ मंत्रराज इति ख्यातः कोटिकोटिगुणाधिकः ॥ ५२ ॥ राज्यं द
द्यात् स्त्रियं दद्यात् पुत्रं दद्याद्धनादिकं ॥ मस्तकं तुष्टकं दद्यात् न च दद्यात्तु
षडक्षरं ॥ ५३ ॥ अश्वमेधसहस्राणि राजसूयशतानि च ॥ एकतः सर्वतीर्था
नि दानव्रततपांसि च ॥ ५४ ॥ एतानि मंत्रराजस्य कलां नार्हंति षोडशीं ॥ गुरु २६
देवप्रसादेन हृदि गम्यः षडक्षरं ॥ ५५ ॥ एष धर्मपरो नित्यं एष दानं परः स्मृ

तिः ॥ एष ज्ञानं परः सूक्ष्म एष योगपरोर्थदः ॥ ५६ ॥ एष व्रतपरः सिद्धिरुधि
रश्व सर्वसंपदां ॥ एष तपपरः श्रेष्ठः ॥ एष यज्ञः परो हवि ॥ ५७ ॥ धर्माणां धर्मनि
चयः पुण्यानां पुण्यसंचयः व्रतानां व्रतराजोसौ देवानां प्रवरो गुरुः ॥ ५८ ॥
इति मंत्रः ॥ स विज्ञेय स्तारकः इति संज्ञितः ॥ कल्पवृक्ष इति ख्यातं साधका
नां फलप्रदं ॥ ५९ ॥ सतु मातस्त्वया ज्ञेयो मंत्रराजः षडक्षरः ॥ विना गुरुप्रसा
देन कथं सिद्धिर्भविष्यति ॥ ६० ॥ एवं चत्रिरस्मातात तत्प्रसादाय महाशिवं
॥ यत्समाद्वान्मतुलं श्रामो दद्याः सहशक्तिभिः ॥ ६१ ॥ महामायोवाच देव

देवजगद्धातालोकानामभयप्रद। प्रसादं कुरु देवेश देहि मंत्रं षडक्षरं
६२। सौमित्रिरुवाच। ततस्संकल्प महाशंभुः प्रणम्यादौ रघूद्वहं। सर्वैश्वर्यप्र
दं मंत्रं दत्तवान् विश्वहेतवे। ६३। तस्य विज्ञानमात्रेण मंत्रस्य जगदीश्वरः
सर्वैश्वर्यपदारूढो महाविष्णुस्स्वयंस्वराट्। ६४। इत्युक्त्वा सो महाशंभुर्भग
वान् प्रभुरव्ययः। विससर्ज महाविष्णुः पुत्रमाघ्राय मस्तके। ६५। ऋषय
ऊचुः। एषा श्रुता महाबाहो सूत्रसंविधिनी कथा। किं न प्रवर्त्तितं लोके यथं के २९
न महात्मना। ६६। एतत्सर्वं कृपापूर्वं कथयस्व यथातथं। त्वं देव जगतां नाथ

कार्यकारणतत्त्ववित्। ६७। सौमित्रिरुवाच। लब्ध्वाह्यथ ततो देवान् ब्रह्मविष्णु
महेश्वरान्। कथयामास देवेशो मूलमंत्रं षडक्षरं। ६८। एकमासो तथा पूर्वं ब्र
ह्मकमलसंभवं। त्रिप्रपंचं यदा प्राप्तं तदेव त्रिविधा कृतं। ६९। प्राकृतं ब्रह्म
सूत्रं च महाशंभवमैश्वरं। गुप्तं चक्रुस्ततो देवा ज्ञात्वा ब्रह्मनिदर्शिनं। गुप्तं रू
तं तदा चासदिव्यं युग सहस्रकं। किमपि कालेना वा च जीवलोका तु कं प
या। ७१। देव्यानुबोधितः श्रीमान् विष्णुः सर्वजनेश्वरः। प्राहयामास तां दे
वीं तारकं ब्रह्मवाचकं। ७२। कल्पकल्पा तदा लक्ष्मी लब्ध्वा मंत्रं षडक्षरं। दं

देशप्रीत्या ततो देवी विष्वक्सेनाय तारकं ॥७३॥ विष्वक्सेनस्ततो मंत्रं लब्ध्वा
न्वैष्णवोत्तमः गोपदेवइति ख्यातो मुनिवर्यः सदात्मवान् ॥७४॥ विंकटाद्रौ
गुरावेदाख्य पराद्दौ पराङ्कुशः ॥ गोपदेवं समाराध्य लप्स्यति षडक्षरं ॥७५
चत्वारस्तस्य विख्याताः शिष्याः पराङ्कुशस्य च ॥ भविष्यति कलौ रंगे ब्राह्म
णो वेदपारगाः ॥७६॥ श्रुतिवेदः श्रुतपदः श्रुतधामा श्रुतोदधिः ॥ त्रिदं
डिनः शिष्यो युक्तो रामानुजश्च पंचमः ॥७७॥ मत्समीपे महापीठे विंकटेशग २८
मंडपे ॥ जपिष्यति चिरं मंत्रं तारकं तिमिरापहं ॥७८॥ श्रीवैष्णवपदं प्रोक्तं राघ

वाल्लरचितं तनात् ॥ भवबंधविनाशाय लोकानां हितकाम्यया ॥७९॥ इदं
स्तोत्रं महाभागा महाशंभवमीरितं ॥ संचरिष्यति कालेन रामानुजमुखा
श्रयं ॥८०॥ इदं दिव्यमिदं रम्यमिदमाद्यमिदं शुचि ॥ गुह्याद्गुह्यतमं सौ
म्य गुह्यानां गुह्यमुत्तमं ॥८१॥ पवित्राणां पवित्रं तत् मंगलानां च मंगलं ॥ श्रे
ष्ठं सर्वदेवानां योगिनां सिद्धिदायकं ॥८२॥ स्त्रीणामाकर्षणं दिव्यं मार
णोच्चाटनं तथा ॥ स्तंभनं परसैन्यानां वशीकरणमायुषं ॥८३॥ उच्चाटनं च पा
पानां दीपनं जाड्यचेतसां ॥ पठनात् श्रवणाच्चास्य मुक्तिरेव न संशयः ॥८४

तस्मात्सर्वप्रजत्नेन प्रविशितव्यं समाहितैः॥८५॥ इतिश्री लक्ष्मणोन्नि
न्त्कायां सदाशिवसंहितायां परमहंस्पेरामानुजवेदसंवादेन
वांशाकतत्वोत्पत्तिर्नाम नवमोध्यायः॥९॥ ॥
॥ ॥श्री॥ ॥श्री॥ ॥श्री॥राम॥ ॥

॥ग्रंथसंख्या ३२५